Dr.Anil C. Deshpande M.D.(Ayu)
Kriyasharir dept.S.S.A.M.Hadapsar,pune 28

# Concept of Dosha

# दोष

दोषधातुमलमूलं हि शरीरम् । सु.सू.15/3

दूषणस्वभावाद् दोषा इति । अ.सं.सू.20/3

दूषयन्तिति दोषाः।अ.हृ. अरुणदत टिका 1/12

वायुः पित्तं कफ़ंश्चेति त्रयो दोषाः समासतः । अ.सं.सू.1/6

वातपित्तश्लेष्माणः एव देहसंभवहेतवः ।सु.सू.21/3

वायु पित्तं कफ़श्चोक्तः शारीरो दोषसंग्रहः ।च.सू. 1/56

# दोष निरुक्ति

प्रकृति आरंभकत्वे सति दुष्टिकर्तृत्वं दोषत्वम् । मा.नि. मधुकोष

शुक्रशोणित संयोगे यो भवेत् दोष उत्कट: प्रकृतिर्जायते तेन् ।सु.

स्वातंत्रेण दूषकत्वं दोषत्वम् । अ.हृ.सू.20/3

विकृता विकृता देहं घ्नन्ति ते वर्तयन्ति च । अ.हृ.सू.1/6

# दोषांची स्थाने

ते व्यापिनो पिह्न्नाभ्योरधोमध्योर्ध्वसंश्रया: । अ.ह्र.सू.1/7

सर्वदेहयव्यापित्वे पि यो यस्मिन् आधिक्येन वर्तते.तत् तस्य स्थानम् ।हेमाद्रि

| दोष | स्थाने | अवयव् |
|---|---|---|
| वात | नाभीच्या अधोभागी | पक्वाशय |
| पित्त | नाभी व ह्रदयामधील प्रदेश | ग्रहणी |
| कफ़ | ह्रदयाच्या उर्ध्वभागी | उ:रस्थान |

# वय आणि त्रिदोष संबंध

बाले विवर्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्धते वायुर्वृध्दे तद्विक्ष्य योजयेत् ॥ सु.सू.३५/२१

| वय | दोषांचे आधिक्य |
|---|---|
| बाल | कफ़ |
| मध्य (तरुणवय) | पित्त |
| वार्धक्य | वात |

# त्रिस्थूण–त्रिदोष

वातपित्तश्लेष्माणः एव देहसंभवहेतवः । तैरेव च अव्यापन्नैः अधोमध्योर्ध्वसंनिविष्टैः शरीरमिदं धार्यते अगारमिव स्थूणाभिस्तिसृभिः अतश्च त्रिस्थूणमाहुरेके । त एव च व्यापन्नाः प्रलयहेतवः । तद् एभिः शोणितचतुर्थैः संभवस्थितिप्रलयेषु अविरहितं शरीरं भवति ।

– सु.सू. 21/3

# त्रिदोष आणि ऋतू संबंध

चयप्रकोपप्रशमाः वायोः ग्रीष्मादिषु त्रिषु ।
वर्षादिषु तु पित्तरस, श्लेष्मणः शिशिरादिषु ।। अ.हृ.सू.

| दोष | संचय | प्रकोप | प्रशम |
|---|---|---|---|
| वात | ग्रीष्म | वर्षा | शरद |
| पित्त | वर्षा | शरद | हेमंत |
| कफ़ | शरद | वसंत | ग्रीष्म |

# पचनाच्या अवस्था व दोषाधिक्य

| पचनाच्या अवस्था | काल | दोषाधिक्य |
|---|---|---|
| मधुर अवस्थापाक | भोजनानंतर लगेच | कफ़ |
| अम्ल अवस्थापाक | पचनाच्या मध्ये | पित्त |
| कटू अवस्थापाक | पचनाच्या शेवटी | वात |

# रस – त्रिदोष संबंध

| दोष | वृद्धीकर रस | शमनकर रस |
|---|---|---|
| कफ़ | मधुर,अम्ल,लवण | कटु,तिक्त,कषाय |
| पित्त | अम्ल,लवण,कटु | मधुर,तिक्त,कषाय |
| वात | कटु,तिक्त,कषाय | मधुर,अम्ल,लवण |

# दोष–दूष्य संबंध

- तत्रास्थिनि स्थितो वायु: पित्तं तु स्वेदरक्तयो: ।
  श्लेष्मा शेषेषु,तेन एषम् आश्रयाश्रयिणां मिथ: ।।। अ.हृ.सू.11/26

| दोष (आश्रयी) | दूष्य (आश्रय) |
|---|---|
| पित्त | रक्त |
| वात | अस्थि |
| कफ़ | रस,मांस,मेद,मज्जा,शुक्र,मूत्र,पुरीष |

# दोषांचे प्रकार

१)द्विविधा वातादय: प्राकृता वैकृताश्च ।तत्र प्राकृता: सप्तविधाया: प्रकृते हेतुभूता: शरीरैकजन्मान: ।अ.सं.8/6

2)वैकृतास्तु गर्भादभिनि:सृतस्य आहाररसस्य मला: संभवति ।अ.सं.8/11

प्राकृतेषु अवरोहन्ति । ते कालादिवशेन स्वप्रमाणवृद्धिक्षययोगाद् देहम् अनुगृह्णाति दूषयन्ति च ।। अ.सं.शा.8/12

वातपित्तश्लेष्माणः एव देहसंभवहेतवः । तैरेव च अव्यापन्नैः अधोमध्योर्ध्वसंनिविष्टैः शरीरमिदं धार्यते अगारमिव स्थूणाभिस्तिसृभिः अतश्च त्रिस्थूणमाहुरेके । त एव च व्यापन्नाः प्रलयहेतवः । तद् एभिः शोणितचतुर्थैः संभवस्थितिप्रलयेषु अविरहितं शरीरं भवति । – सु.सू. 21/3

# त्रिदोष महत्ती

विसर्गादानविक्षेपैः सोमसूर्यानिला यथा ।
धारयंति जगद् देहं कफपित्तानिलास्तथा ॥ – सु.सू. 21/8

विसर्गः सर्जनं बलस्य इति शेषः । आदानं ग्रहणं बलस्यैव, विक्षेपः शीतोष्णादीनां विविधप्रकारेण प्रेरणम् । – डल्हणः

विसर्गः सौम्यांशविसर्जनं चंद्रस्य कफस्य च । आदानं सौम्यांशशोषणं सूर्यस्य पित्तस्य च । विक्षेपश्च बहिरन्तश्च उचितधातुव्यूहनादिः वायोः साधारणम् । – सु. सू. 21/8 भानुमतीटीका

# त्रिदोष महती

नित्याः प्राणभृतां देहे वातपित्तकफास्त्रयः ।
विकृताः प्रकृतिस्था वा तान्बुभुत्सेत पंडितः ॥
उत्साहोच्छ्वासनिःश्वासचेष्ट धातुगतिः समा ।
समो मोक्षो गतिमतां वायोः कर्माऽविकारजम् ॥ –

च. सू. 18/54–55

# विसर्गादानविक्षेपैड्ड्ड्ड्ड्ड्ड्ड,

विसर्ग– विसर्गः सर्जनं बलस्य

आदान– ग्रहणं बलस्यैव,

विक्षेपः– शीतोष्णादीनां विविधप्रकारेण प्रेरणम्

(डल्हणः)



# Vatadosha

- तत्र वा गतिगंधनयोरिति धातुः , तप संतापे , श्लिष आलिंगने , एतेषां कृद्विहितैः प्रत्ययैः वातः पित्तं श्लेष्मा इति च रुपाणि भवन्ति । – सु. सू.21/5

  यथाग्निः पंचधा भिन्नो नामस्थानात्मकर्मभिः ।

  भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः ॥ –सु. नि. 1/11

- तेषां त्रयाणामपि दोषाणां शरीरे स्थानविभाग उपदिश्यते । तद्द्यथा बस्तिः पुरीषाधानं कटिः सक्थिनी पादौ अस्थिनी च वातस्थानानि । अत्रापि पक्वाशयो विशेषेण वातस्थनम । –च.सू. 20/9

- पुरीषाधानं पक्वाशयः । यद्दपि प्राणादिभेदभिन्नस्य वायोः पृथगेव स्थानानि वक्ष्यति ... ।

# वातस्थानानि

- पक्वाशयकटीस्क्थिश्रोत्रास्थिस्पर्शनेंद्रियम् ।
  स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥ – अ. हृदय सू. 12/1

- आस्थापनानुवासनं तु खलु सर्वोपक्रमेभ्यः वाते प्रधानतमं मन्यन्ते भिषजः । तद् आदितः एव पक्वाशयमनुप्रविश्य केवलं वैकारिकं वातमूलं छिनत्ति । तत्र अवजिते वातेऽपि शरिरान्तर्गता वातविकाराः प्रशांतिमापद्दन्ते । यथा वनस्पतेः मूले छिन्ने स्कंधशाखावरोहकुसुमफलपलाशादिनां नियतो विनाशः , तव्दत् । – च. सू. 20/15

# वातस्थानानि

- वायुः ... । आशुकारी मुहुश्चारी पक्वाधानगुदालयः । – सु. नि. 1/9
- तत्रास्थनि स्थितो वायुः । – अ. हृ. सू. 11/26
- वायुः ... प्रकृतिः स्पर्शशब्दयोः श्रोत्रस्पर्शनयोर्मूलम् । – च. सू. 12/8
- श्रवणमूलत्वं वायोः कर्णशष्कुलिरचनाविशेषे व्याप्रियमाणत्वात् । मूलं प्रधानकारणम् । – चक्रदत्तः
- स्पर्शनेऽभ्यधिको वायुः स्पर्शनं च त्वगाश्रितम् । – च. सू. 5/84

# वातगुणा:(चरकानुसार)

- रुक्षः शितो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
  विपरीतगुणैर्द्रव्यैः मारुतः संप्रशाम्यति ॥ – च.सू.1/58

- रुक्ष–लघु–शीत–दारुण–खर–विशदाः षडिमे वातगुणा भवंति । – च. सू. 12/4

- वातस्तु रुक्षलघुचलबहु–शीघ्र–शीत–परुष–विशदः । – च. वि. 8/14

- रौक्ष्यं लाघवं वैशद्यं शैत्यं गतिः अमूर्तत्वं चेति वायोः आत्मरूपाणि भवन्ति । – च.सू.20/13

स्वयंभूरेष भगवान् वायुरित्यभिशब्दितः ।
स्वातंत्र्यान्नित्यगत्वाच्च सर्वगत्वात् तथैव च ॥
सर्वेषमेव सर्वात्मा सर्वलोकनमस्कृतः ।
स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणम् ॥
अव्यक्तो व्यक्तकर्मा च रुक्षः शीतो लघुः खरः ।
तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च ॥
अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट् ।
आशुकरी मुहुश्चारी पक्वाधानगुदालयः ॥ – सु. नि. 1/5–8

# वातगुणाः(सुश्रूतानुसार)

- तत्र शैत्यरौक्ष्यलाघववैशद्दवैष्टंभ्यगुणलक्षणो वायुः । – सु.सू.42/8

स्वयंभूरेष भगवान् वायुरित्यभिशब्दितः ।
स्वातंत्र्यान्नित्यगत्वाच्च सर्वगत्वात् तथैव च ॥
सर्वेषमेव सर्वात्मा सर्वलोकनमस्कृतः ।
स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणम् ॥
अव्यक्तो व्यक्तकर्मा च रुक्षः शीतो लघुः खरः ।
तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च ॥
अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट् ।
आशुकरी मुहुश्चारी पक्वाधानगुदालयः ॥ – सु. नि. 1/5–8

# वातगुणाः(अष्टांगहृदयानुसार)

- तत्र रुक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः । – अ.हृ. सू. 1|11

- विभुत्वादाशुकारित्वाद् बलित्वादन्यकोपनात् ।
  स्वातंत्र्याद्बहुरोगत्वाद् दोषाणां प्रबलोऽनिलः ॥ – अ.हृ. शा.3/86

# वातगुणा:(शारडधरानुसार)

- पवनस्तेषु बलवान् विभागकरणान्मतः ।
  रजोगुणमयः सूक्ष्मः शीतो रुक्षो लघुश्चलः ॥ – शा. प्रथमखंड 5/26

- शरीरदूषणाद् दोषा धातवो देहधारणात् ।
  वातपित्तकफा ज़ेया मलिनीकरणान्मलाः ॥ – शा. ख. 1 अ. 5

# वायुचे योगवाहित्व

योगवाहः परं वायुः संयोगादुभयार्थकृत् ।

दाहकृत्तेजसा युक्तः शीतकृत्सोमसंश्रयात् ॥–च. चि. 3/38

# वायुचे कार्य

(१)वायुस्तंत्रयंत्रधरः, (२) प्राणोदानसमानव्यानापानात्मा, (३) प्रवर्तकश्चेष्टानाम् उच्चावचानाम्, (४) नियंता प्रणेता च मनसः,(५)सर्वेन्द्रियाणाम् उद्योजकः, (६) सर्वेन्द्रियार्थानाम् अभिवोढा, (७) सर्वशरीरधातु–व्यूहकरः, (८) संधानकरः शरीरस्य, (९) प्रवर्तको वाचः, (१०) प्रकृतिः स्पर्शशब्दयोः, (११) श्रोत्रस्पर्शनयोः मूलम्, (१२) हर्षोत्साहयोः योनिः, (१३) समीरणोऽग्नेः, (१४) दोषसंशोषणः, (१५) क्षेप्ता बहिर्मलानाम्, (१६) स्थूलाणुस्रोतसां भेत्ता, (१७) कर्ता गर्भाकृतीनाम्, (१८) आयुषः अनुवृत्ति–प्रत्ययभूतः भवति अकुपितः । – च. सू. 12/8

# वायुचे कार्य

यावत्तिष्ठति वातो हि देही तावत्तु जीवति । – भे. सं. अ. १६

सर्वा हि चेष्टा वातेन स प्राणः प्राणिनां मतः ।
तेनैव रोगा जायंते तेन चैवोपरुध्यते ॥ – च. सू. १७/११६

उच्छवास–निःश्वास–उत्साह–प्रस्पंदन–इंद्रियपाटव–वेगप्रवर्तनादिभिः
वायुः अनुगृण्हाति । – अ. संग्रह सू. १९

# वायुचे कार्य

उत्साहोच्छवासनिश्वासचेष्टावेगप्रवर्तनैः ।

सम्यग्गत्या च धातूनामक्षाणां पाटवेन च ॥

अनुगृण्हात्यविकृतः ( देहं वायुः) –अ. हृदय सू. ११/१

शरीरावयवास्तु परमाणुभेदेन अपरिसंख्येया भवन्ति, अतिबहुत्वात् अतिसौक्ष्म्यात् अतींद्रियत्वाच्च । तेषां संयोगविभागे परमाणूनां कारणं वायुः कर्मस्वभावश्च । – च. शा. ७/१५–१६

# प्राणवायु

वायुर्यो वक्त्रसंचारी स प्राणो नाम देहधृक् ।

सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलंबते ।

प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ॥ – सु. नि. १/१३–१४

स्थानं प्राणस्य शीर्षोरःकण्ठजिव्हाऽऽस्यनासिकाः ।

ष्ठीवनक्षवथूग्दारश्वासाहारादि कर्म च ॥ – च. चि. २८/४

आहारादि इत्यत्र आदिग्रहणाद् अन्नविधारणनिःसरणादीनि गृह्यन्ते । – चक्रदत्तः

तत्र प्राणः मूर्धनि अवस्थितः कंथोरश्चरः बुध्दींद्रियहृदयमनोधमनीधारणष्ठीवनक्षवथूद्गारप्रश्वासोच्छ्वासान्नप्रवेशादिक्रियः । – वा. अ. सं. सू. अ. २०

प्राणादिभेदात् पंचात्मा वायुः प्राणोऽत्र मूर्धगः ।

उरःकंठचरो बुद्धिहृदयेंद्रियचित्तधृक् ।

ष्ठीवनक्षवथूद्गार – निश्वासान्नप्रवेशकृत् ॥ – वा. अ. हृदय सू. १२/४–५

प्राणस्य मूर्धा अवस्थितिस्थानम् । उरः कंठश्च विचरणस्थानम् । . . . हृदयं मनोऽधिष्ठानम् । चित्तं मनः । इंद्रियाणि चक्षुरादीनि । – अ. हृ. सू. १२/४–५

प्राणः प्रीणाति भूतानि प्राणो जीव् एति स्मृतः । – भे. सं. सू. अ. १६

अन्नमादानकर्मा तु प्राणः कोष्ठं प्रकर्षति । – च. चि. १५/६

नाभिस्थः प्राणपवनः . . . । – शा. खं. १ अ. ५/४८.

तत्र प्राणवहानां स्रोतसां हृदयं मूलं महास्रोतश्च । – च. वि. ५/९

प्राणवहानामिति प्राणसंज्ञकवातवहानाम् । एतच्च प्राणाख्यविशिष्टस्य वायोः विशिष्टस्रोतः । – चक्र. च. वि. ५/९

# उदानवायु

उदानवायुः

उदानस्य पुनः स्थानं नाभ्युरः कंठ एव च ।

वाक् प्रवृत्तिः प्रयत्नौजोबलवर्णादिकर्म च । – च. चि.२८/७

ऊर्जः बलर्णनिष्पादनमुच्यते । – चक्र

प्राणोदानयोः यद्दपि समानम् उरःस्थानं, तथापि कर्मभेदाद् भेद एव । यथैव एकगृहस्थितमालाकारकुंभकारयोः । – चक्र. च. चि. २८/७

उदानो नाम यस्तूर्ध्वमुपैति पवनोत्तमः ।

तेन भाषितगीतादिविशेषोऽभिप्रवर्तते ।

ऊर्ध्वजत्रुगतान्रोगान् करोति च विशेषतः ॥ – सु. नि. १/१४–१५

उपैति गच्छति । स्थानं पुनः अनुक्तमपि अस्य नाभ्युरःकंठादि । भाषितगीतादिरिति आदिशब्दाद् उच्छ्वासादिविशेषाः । – डल्हण सु. नि. १. १४–१५

उदानः उरसि अवस्थितः कंठनासिकानाभिचरः वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्रोतःप्रीणनधीधृतिमनोबोधनादिक्रियः । – अ. संग्रह सू. अ. २०

उरःस्थानमुदानस्य नासानाभिगलांश्चरेत् ।

वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्मृतिक्रियः ॥ – अ. हृदय सू. १२/५–६

उदानस्य प्रधानम् उरस्थानं नासादींश्च चरति । . . . . . प्रयत्नः कार्येषु पदार्थग्रहणादिषु उद्यमः । – अरुणदत्तः

उदानस्य उरः अवस्थितिस्थानम् । नासादि विचरणस्थानम् । . . . . .प्रयत्न उत्साहः । ऊर्जा प्राणनम् । – अ. हृ. १२ हेमाद्रिः

उदानवायोराधारः फुफ्फुसः प्रोच्यते बुधैः । – शा. खं. १ अ.. ५/४३

हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।

उदानः कंठदेशस्थः व्यानः सर्वशरीरगः ॥ – शार्ङ्धर खं. १ अ. ५/२७ दीपिका टिका.

विशेषाज्जीवितं प्राणः, उदानो बलमुच्यते । – अ. हृ. निदान १६/५६

# समानवायु

स्वेददोषांबुवाहानि स्रोतांसि समधिष्ठितः ।
अन्तरग्नेश्च पार्श्वस्थः समानोऽग्निर्बलप्रदः ॥ – च. चि. २८/८

दोषवहानि च स्रोतांसि सर्वशरीरचराण्येव । – चक्र. च. वि. ५–३
आमपक्वाशयचरः समानो वह्निसंगतः ।
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ।

गुल्माग्निसादातीसारप्रभृतीन् कुरुते गदान् ॥ – सु. नि. १/१६–१७
सोऽन्नं पचति इति अग्निसंधुक्षणाद् भक्तकार इव् । तज्जान् अन्नपाकजान् । विशेषान् रसदोषमूत्रपूरीषाणि विविनक्ति पृथक्करोति । – डल्हणः

समानः अंतरग्निसमीपस्थः तत्संधुक्षणः
पक्वामशयदोषमलशुक्रार्तवाम्बुवहस्त्रोतोविचरी तदवलंबनान्नधारण–पाचन–विवेचन–किट्टाधोनयनादिक्रियः । –अ.सं.सु.अ. २०

समानोऽग्निः समीपस्थः कोष्टे चरति सर्वतः ।
अन्नं गृह्याति पचति विवेचयति मुंचति ॥ –अ.हृदय.सू १२/८

समानस्य अग्निसमीपम् अवस्थितिस्थानम् । सर्वकोष्टो विचरणस्थानम् ।अन्नस्य ग्रहणं,गृहीत्वा पाचनम्,पक्त्वा सारकिट्ट्विवेचनं,विविच्य किट्टावमोचनं च कर्म ।अग्निसमीपम् अग्निस्थानस्य ग्रहण्याख्यस्य अग्न्यवरुध्दः अवकाशः । –अ.हृ.सू. १२/८ आयुर्वेदरसायनटीका.
रसस्तु हृदयं याति समानमरुतेरितः । ––शा.भ.खं

# व्यानवायु

---

देहं व्याप्नोति सर्वं तु व्यानः शीघ्रगतिर्नृणाम् ।

गतिप्रसरणाक्षेपनिमेषादिक्रियः सदा ॥ –च.चि. २८/९

गतीत्यादौ आदिशब्देन आकुंचनप्रसारणादीनां च ग्रहणम् । –चक्र.च.चि. २८/९

कृत्स्नदेहचरो व्यानो रससंवहनोद्यतः ।

स्वेदासृक्स्रावणश्चापि पंचधा चेष्टयत्यपि ।

क्रुध्दश्च कुरुते रोगान् प्रायशःसर्वदेहगान् ॥ – सु.नि. १/१७–१८

व्यानो ह्रदि अवस्थितः कृत्स्नदेहचरः शीघ्रतरगतिः,गति–प्रसारण–आकुंचन–उत्क्षेप–निमेष–उन्मेष–जृंभण–अन्नस्वादन–स्त्रोतोविशोधन–स्वेदासृ–क्स्त्रावणादिक्रियः,योनौ च शुक्रप्रतिपादनः विभज्य च अन्नस्य किट्टात् सारं तेन क्रमशः धातूंस्तर्पयति । अ. संग्रह सू. अ. २०

व्यानो हृदि स्थितः कृत्स्नदेहचारी महाजवः ।

गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ।

प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबध्दाः शरीरिणाम् ॥ – अ. हृ. सू. १२/६–७

# अपानवायु

**अपानवायुः–**

वृषणौ बस्तिमेढ्रं च नाभ्यूरु वंक्षणौ गुदम् ।

अपानस्थानयं(मं) त्रस्थः शुक्रमूत्रशकृत्क्रियः ।

सृजत्यार्तवगर्भौ च (युक्ताः स्थानस्थिताश्च ते) । – च. चि. २८/१०–४

यंत्रस्थ इति बस्त्यादिगतः । सृजतीति निःसारयति इति यावत् । – तत्रैव चक्रः

पक्वाधानालयोऽपानः काले कर्षति चाप्ययम् ।

समीरणः शकृन्मूत्रशुक्रगर्भार्तवान्यधः ।

क्रुध्दश्च कुरुते रोगान् घोरान् बस्तिगुदाश्रयान् ॥ – सु. नि. १/१९–२०

पक्वाधानालयः पक्वाशयस्थान इत्यर्थः । – डल्हणः

अपानस्तु अपाने स्थितः । बस्तिश्रोणिमेढ्र्वृषणवंक्षणोरुचरः विण्मुत्रशुक्रार्तवगर्भनिष्क्रमणादिक्रियः । – अ. संग्रह. सू. अ. २०

अपनोऽपानगः श्रोणिबस्तिमेढ्रोरुगोचरः ।
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः ॥ वा. अ. हृदय सू. १२/९

अपानस्य अपानं गुदम् अवस्थितिस्थानम । श्रोण्यादि विचरणस्थानम् । श्रोण्यादि विचरणस्थानम् । शुक्रादिनिष्क्रमणं कर्म । गोचरः विचरणविषयः । – हेमाद्रिः तत्रैव

# पित्तदोष

तत्र वा गतिगंधनयोरिति धातुः तप संतापे, श्लिष आलिंगने, एतेषां कृद्विहितैः प्रत्ययैः वातः पित्तं श्लेष्मा इति च रुपाणि भवन्ति । – सु. सू. २१/५

अग्निर्वैश्वानरो वन्हिर्वीतिहोत्रो धनंजयः ।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात ।

आश्रयाशो बृहभ्दानुः कृशानुः पावकोऽनलः । इ. – अमर १/५६
ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः । – अ. हृ. सू. १/७

# पित्तस्थानानि

- स्वेदो रसो लसीका रुधिरम् आमाशयः पित्तस्थानानि । तत्रापि आमाशयो विशेषेण पित्तस्थानम् । – च. सू. २०/९
- लसीका उदकस्य पिच्छाभागः । पित्तस्थाने आमाशय इति आमाशयाऽधोभागः । – चक्रः तत्रैव
- दोषस्थानानि अत ऊर्ध्वं वक्ष्यामः । तत्र समासेन . . . पक्वामाशयमध्यं पित्तस्य । – सु. सू. २१/६
- पित्तस्य यकृत्प्लिहानौ हृद्यं दृष्टिस्त्वक्, पूर्वोक्तं च (आमाशय इति) । – सु. सू. २१/७
- यकृत्प्लिहानौ इति यकृत् कालखंडम् , प्लीहा वामपार्श्वाश्रयं मांसखंडम् । हृदयं कमलमुकुलाकारम् अधोमुखम् । दृष्टिः कृष्णतारकान्तर्वर्तिनी मसूरदलमात्रा । चकारात् परतंत्रोक्तं लसीकाद्दनुक्तं समुच्चीयते । पित्तेन स्विन्नमांसात् स्रवद् उदकं लसीक इत्युच्यते । – डल्हणः

नाभिरामाशयः स्वेदो लसीका रुधिरं चक्षुः स्पर्शनं च पित्तस्थनानि । अत्र नाभिर्विशेषेण । – संग्रह सू. अ. २०

नाभिरामाशयः स्वेदो लसीक रुधिरं रसः ।

दृक् स्पर्शनं च पित्तस्य नाभिरत्र विशेषतः ॥ – अ. हृ. सूत्र. १२/२

पित्तस्य नाभ्यादीनि स्थानानि । लसीका जलसदृशी । अरुणदत्तः तत्रैव

आमाशयः नाभेः ऊर्ध्वम् अपक्वान्नस्थानम् । लसीका स्याद् रसमलः जलप्रायः त्वगाश्रयः । – हेमाद्रिः तत्रैव

- षष्ठी पित्तधरा नाम या कला परिकीर्तिता ।
- पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ॥
- ग्रहण्या बलमग्निर्हि स चाऽपि ग्रहणीं श्रितः ।
- तस्मात्संदूषिते वह्नौ ग्रहणी संप्रदुष्यति ॥ – सु. उ. ४०/१६९–१७०

# पित्तस्य गुणाः

सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु ।
विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति ॥ – च. सू. १/६०

औष्ण्यं तैक्ष्ण्यं लाघवं सरत्वं द्रवत्वम् अनतिस्नेहः वर्णश्च शुक्लारुणवर्जो गंधश्च विस्रः , रसौ च कटुकाम्लौ पित्तस्य आत्मरुपाणि , एवंविधत्वाच्च कर्मणः स्वालक्षण्यमिदमस्य भवति । – च. सू. २०/१७

गंधो विस्र इति आमगंधः । – चक्रः

पित्तम् उष्णं तीक्ष्णं द्रवं विस्रम् अम्लं कटुकं च । – च. वि. ८/९९

पित्तं ह्यमधुरम् उष्णं तीक्ष्णं च । – च. वि. १/१५

पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च ।
उष्णं कटुरसं चैव विदग्धं चाम्लमेव च ॥ – सु. सू. २१/११

तीक्ष्णं राजिकामरिचादिवत् । पूति विस्रगंधि । नीलं सामावस्थायाम् । पीतं निरामावस्थायाम् । कटुरसं प्रकृतिस्थं पित्तम् । विदग्धं चाम्लमेवेति विरुध्दपाकोपपन्नं पुनरम्लरसं भवति । विदग्धाजीर्णसंसृष्टम् अम्लरसं भवति इत्यन्ये । द्रवस्थाने केचित् सरमिति पठन्ति । – डल्हणः

औष्ण्य–तैक्ष्ण्य–रौक्ष्य–लाघव–वैशद्यगुणलक्षणं पित्तम् । –सु. सू. ४२/७(२)

पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् । अ. सं. सू. १ तथा अ. हृ. सू. १/११

सस्नेहमीषत्स्निग्धम् । . . . तीक्ष्णं शीघ्रकारि मंदविपरीतं सूचीव भिनत्ति । . . . विस्रं दुर्गंधि मत्स्यामगंधि । सरं व्याप्तिशीलं सरणशीलम् ऊर्ध्वाधः प्रवर्तते , न स्थिरम् आस्ते शकृद्विस्रंसि वा । – टीका –वा. अ.हृ.सू. १/११ अरुणदत्तः

सस्नेहादयः सप्त । . . . विस्रं दुर्गंधि । – हेमाद्रिः

पित्तम् उष्णं द्रवं पीतं नीलं सत्वगुणोत्तरम् ।

कटुतिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत् ॥ – शा. सं. प्रथमखण्ड ५/

# पाचक पित्त

- तच्च अदृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्विधम् अन्नपानं पचति , विवेचयति च दोषरसमूत्रपुरीषाणि । तत्रस्थमेव च आत्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य च अग्निकर्मणा अनुग्रहं करोति , तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा । – सु. सू. 21/10
- पक्वामाशयमध्यस्थमिति नाभिस्थम् । . . . चतुर्विधमिति चव्यचोष्यलीढपीतमित्यर्थः । विवेचयति च पृथक्करोति दोषरसमूत्रपुरीषाणि । – डल्हण
- पित्तं पंचात्मकं तत्र पक्वामाशयमध्यगम् ।
- पंचभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥
- त्यक्तद्रवत्वं पाकादिकर्माणाऽनलशब्दितम् ।
- पचत्यन्नं विभजते सारकिट्टौ पृथक्तथा ।
- तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
- करोति बलदानेन पाचकं नाम तत्स्मृतम् ॥ – अ. हृ. सू. 12/10–12

**(2)रंजकं पित्तम् रंजकोऽग्निः –**

यत्तु यकृत् प्लिह्नोः पित्तं, तस्मिन् रंजकोऽग्निरिति संज्ञा, स रसस्य रागकृत् । – सु.सू. 21/10

आमाशयाश्रयं पित्तं रंजकं रसरंजनात् । –अ.हृ.सू 12/13

यत्तु आमाशयस्थं पित्तं तद् रसाख्यधातोः रंजनात् रागनिष्पादनात् रंजकमुच्यते । –अरुणदत्तः

रंजकस्य आमाशयः स्थानम् । रसरंजनं कर्म । –हेमाद्रिः

ह्रश्यं यकृति यत् पित्तं तद्रसं शोनितं नयेत् ॥ – शां.पू.अ.5/31

यत् पित्त यकृति कालखडे द्दश्यं द्दष्टिगोचरं तद्रसम् शोणतां नयेत् करोति इत्यर्थः ।

ताद्दशमिति याद्दक् प्लिहास्थानेऽस्ति ताद्दक् भवति भावः । – आढमल्लः

रंजकं नाम यत् पित्तं तद्रसं शोनितं नयेत् । –भा.प्र. पुर्व 2/143 ग.प्र 3/124

# साधक पित्त

यत्पित्तं ह्रदयसंस्थं,तस्मिन् साधकोऽग्निरिति संज्ञा । स अभिप्रार्थितमनोरथसाधनकृद् उक्त: । –सु.सू. २१/१०

साधको धमार्थकाममोक्षलक्षणपुरुषार्र्थस्य साधक: इत्यर्थ: । कस्मात् ? ह्रदयस्यकफ़तमोऽपनोद्विस्पष्टीकृतमन:प्रागुण्यात् । –सु.सू. २१/१० टीका डल्हण:

ह्रदयस्थं बुध्दिमेधाभिमानोत्साहैरभिप्रतार्थ–साधनात् साधकम् । –अ.सं.सू २०

ह्रदये “ बुध्दिमेधाभिमानाद्दैरभिप्रेतार्थसाधनात् साधकं ह्रग्दतं पित्तम् ” । – अ.हृ.सू १२/१३–१४

यत्त ह्रग्दतं ह्रदयस्थं पित्तं तद् बुध्दयादिभि: करणभूतै: अभिप्रेतस्य अर्थस्य बाह्यग्रहणस्मरणादिरुपेण

साधानात् साधकमुच्यते । वर्तमानकाले या मनोर्थसंशयस्य निश्चयं कर्तुं तदर्थाध्यवसायोपारुढा सा बुध्दि: ।

बुध्दिविशेषो मेधा । –अरुणदत्त:

यत् पित्तं हृदये तिष्ठेन्मेधाप्रज्ञाकरं च तत् । – शां.पू.प्र.खं.अ. ५/३१

यत् पित्तं हृदये चेतनास्थानेऽस्ति तन्मेधाप्रज्ञाकरं बोध्दव्यम् । कस्मात् हृदयस्थकफतमोऽपनोदनेन विस्पष्टीकृतत्वात् । मेधा धीर्धारणा बुध्दिः प्रज्ञा अनागतोपदेशरुपा मतिः । चकाराद् अभिप्रार्थितमनोरथसाधनकृद् इत्युक्तम् । – आढमल्लः

यत् साधकसंज्ञं तद् कुर्याद् बुध्दिं धृतिं स्मृतिम् । –भा.प्र.पु.ख.ग.प्र.ग.प्र ३/१२४, भा,प्र.पू २/१४३

# आलोचक पित्त

यद् दृष्टयां पित्तं, तस्मिन् आलोचकोऽग्निरिति सज्ञां, स रुपग्रहणाधिकृतः । –सु.सू. २१/१०

संग्रहे दृष्टिस्थं रुपालोचनाद् अलोचकम् । –अ.सं.सू २०

ह्रदये ङ्ग रुपालोचनतः स्मृतम् । दृकस्थमालोचकमङ्ग. – अ.हृ.सू १२/१४

दृष्टिस्थं पित्तं रुपालोचनात्, अंतस्तारकयोः स्थितं तदायत्तरुपग्रहणशक्तित्वाद् अलोचकमुच्यते ।

यत् पित्तं नेत्रयुगले रुपदर्शनकारि तत् । – शां.पू.अ. ५/३१

यत् पित्तं नेत्रयुगले अस्ति तद् रुपदर्शनकारि भवति । रुपं पीतशुक्लादिकम् । – आढमल्लः

यदालोचकसंज्ञं तद् रुपग्रहणकारणम् । भा.प्र.पू २/१४४ ग.प्र. १२५.

# भ्राजक पित्त

यत्तु त्वचि पित्तं, तस्मिन् भ्राजकोऽग्निरिति सज्ञां । सः अभ्यंगपरिषेक–अवगाह्–अवलेपनादीनां क्रियाद्रव्याणां, छायानां च प्रकाशकः । –सु.सू. २१/१०

क्रियाद्रव्याणां क्रियानिमित्तानां कर्मनिमित्तानामित्यर्थः । छायानां च प्रकाशकः इति छायानां पांचभौतिकानां नीलादीनां, प्रकाशकः उत्पादकः, चकारात् प्रभाणां पांचभौतिकानां च प्रकाशकः। ननु छायाप्रभयोः को भेदः ।उच्यते–आसन्ना लक्ष्यते च्छाया,प्रभा दूरात् प्रकशते । वर्णमाक्रमति च्छाया प्रभा वर्णप्रकाशिनी (च.दू.अ.१) इति । –डल्हणः

(संग्रहे) त्वक्स्थं त्वचो भ्राजनात् भ्राजकम् ।तद् अभ्यंग–परिषेकलेपादीन् पाचयति छायाश्च प्रकाशयति । अ.सू.सं.अ.२०

(हृदये) त्वक्स्थं भ्राजकं भ्राजनात् त्वचः । –अ.हृ.सू. १२/१४

त्वचि कांतिकरं ज्ञेयं लेपाभ्यंगादिपाचकम् । –शांर्ग.पू.अ. ५/३०

यदेव पित्तं त्वचि अस्ति, तत् कांतिकरं ज्ञेयम्, लेपाभ्यंगादिपाचकं च भवति तदुष्णगुणयोगात् । ऊष्मा शरिरस्य उष्ण्त्वम् ।

लेपाभ्यंगादि इति आदिग्रहणात् स्नानावगाहनादीनां ग्रहणम् । त्वग् अन्न अवभासिनी नाम ज्ञेया बाह्यत्वग् इत्यभिप्रायः।–आढमल्लः।

भ्राजकं कांतिकारित्वाल्लेपाभ्यंगादिपाचकम् । –भा.प्र.पूर्व ग.प्र ३/१२५

# वात प्रकृति

वातस्तु रुक्षलघुचलबहुशीतपरुषविशदः। तस्य रौक्ष्याद् वातला रुक्षापचिताल्प शरीराः प्रततरुक्षक्षामभिन्नमन्दसक्तजर्जरस्वराः । जागरुकाश्च भवन्ति,लघुत्वाच्च लघुचपलगतिचेष्टाहारव्याहाराः, चलत्वाच्च अनवस्थितसन्ध्यस्थिभ्रूहन्वोष्ठजिव्हाशिरःस्कंधपाणिपादाः,बहुत्वाद् बहुप्रलापकंडरासिराप्रतानाः, शीघ्रत्वात् शीघ्रसमारंभक्षोभविकाराः शीघ्रोत्रासरागविरागाः श्रुतग्राहिणोअल्पस्मृतयश्च, शैत्यात् शीतासहिष्णवः प्रततशीतकोद्वेपकस्तम्भाः, पारुष्यात् परुषकेशश्मश्रुरोमनखदशनवदनपाणिपादांगाः, वैशद्यात् स्फुटितांगावयवाः सततसन्धिशब्दगामिनश्च भवन्ति, त एवं गुणयोगाद् वातलाः प्रायेण अल्पबलाश्च अल्पापत्या अल्पायुषश्चाल्पसाधनाश्च अल्पधनाश्च अधन्याश्च भवन्ति ।

–च. वि. ८/१००

तत्र यः प्रजागरुकः शीतद्वेषी दुर्भगः स्तेनो मत्सर्यनार्यो गांधर्वचित्तः स्फुटितकरचरणो अल्परुक्षश्मश्रुनखकेशः क्राथी दन्तनखखादी च भवति । अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी । द्रुतगतिरट्नो अनवस्थितात्मा वियदपि गच्छति संभ्रमेण सुप्तः ॥ अव्यवस्थितमतिश्चलदृष्टिः मन्दरत्नधनसंचयमित्रः । किंचिदेव विलपत्यनिबध्दं मारुतप्रकृतिरेष मनुष्यः ॥ वातिकाश्वाजगोमायुशशाखूष्ट्शुनां तथा । गृध्रकाकखरादीनामनूकैः कीर्तिता नराः ॥

सु.शा.४/६४–६७

प्रायो अत एव पवनाध्युषिता मनुष्या दोषात्मका: स्फुटितधूसरकेशगात्रा: ।
शीतद्विषश्चलधृतिस्मृतिबुध्दिचेष्टा सौहार्द्रदृष्टिगतयो अतिबहुप्रलापा: ॥
अल्पवित्तबलजीवितनिद्रा: सन्नसक्तचलजर्जरवाच: । नास्तिका बहुभुज:
सविलासा गीतहासमृगयाकलिलोला: ॥ मधुराम्लकटूष्णसात्म्यकांक्षा:
कृशदीर्घाकृतय: सशब्दयाता: । न दृढा न जितेंद्रिया न चार्या न च
कांतादयिता बहुप्रजा वा ॥ नेत्राणि चैषां खरधूसराणि वृत्तान्यचारुणि
मृतोपमानि । उन्मीलितानीव भवन्ति सुप्ते शैलद्रुमांस्ते गगनं च यान्ति ॥
अधन्या मत्सराध्माता: स्तेना: प्रोब्दध्दपिंडिका: ।
श्वश्रृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिका: ॥

अ.हृ.शा.३/८५–८९

यः कृष्णवर्णश्चपलो अतिसूक्ष्मः केशाल्परुक्षो बलवान् क्षमः स्यात् ।

सूक्ष्मातिदन्तो नखवृद्धिमेति दीर्घस्वनश्चंक्रमणक्षमो असौ ॥

दीर्घाक्रमो लोलुपहीनसत्वस्तथैव चाम्लीरसभोजनेच्छुः ।

संस्वेदनेनातिविमर्दनेन सौख्यं समागच्छति वातलो नरः ॥

–हारीत अ.५/१७–१८

# पित्त प्रकृति

पित्तमुष्णं तीक्ष्णं द्रवं विस्त्रमम्लं कटुकश्च । तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा उष्णमुखाः सुकुमारावदातगात्राः प्रभूतपिप्लुव्यंगतिलकालकाः क्षुतपिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायो मृदु अल्पकपिलश्मश्रुलोमकेशाः, तैक्ष्ण्यात् तीक्ष्णपराक्रमास्तीक्ष्णाग्नयः प्रभूताशनपानाः क्लेशासहिष्णवो दन्दशूकाः, द्रवत्वात् शिथिलमृदुसंधिमांसाः प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च, विस्रत्वात् पूतिवक्षः कक्षास्यशिरः शरीरगन्धाः कट्वम्लत्वाद् अल्पशुक्रव्यवायापत्याः, त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च भवन्ति ।

च. वि. ८/९९

स्वेदनो दुर्गन्धः पीतशिथिलांगस्ताम्रनखनयनतालुजिव्हौष्ठपाणिपादतलो दुर्भगो वलीपलितखलित्यजुष्टो बहुभुगुष्णद्वेषी क्षिप्रकोपप्रसदो मध्यबलो मध्यमायुश्च भवति । मेधावी निपुणमतिर्विगृह्य वक्ता । तेजस्वी समितिषु दुर्निवारवीर्यः । सुप्तः सन् कनकपलाशकर्णिकारान् । संपश्येदपि च हुताशविद्युदुल्काः ॥ न भयात् प्रणमेदनतेष्वमृदुः । प्रणतेष्वपि सान्त्वनदानरुचिः । भवतीह सदा व्यथितास्यगतिः स भवेदिह पित्तकृतप्रकृतिः ॥
भुजंगोलूकगंधर्वयक्षमार्जारवानरैः । व्याघ्रर्क्षनकुलानूकैः पैत्तिकास्तु नराः स्मृताः ॥

–सु.शा.४/६८–७१